VI semester B.A[CBCSS

Core Course in Sanskrit (special)Vyakarana

Code-IX- Thaddhida Paricaya

Sample question paper

संस्कृतभाषया उत्तराणि देयानि।

देवनागरीलिपिरुपयोक्तव्या।

Time: 3 Hours

Maximum Weight -25

## PART A

**I-16 एकेन पदेन उत्तरं लिखत**

I १ .अश्वपत्यादिभ्यश्च इति सूत्रेण किम् विधीयते?

२. गार्ग्यः-केन सूत्रेण यञ् प्रत्ययः?

३. आदित्यः इत्यत्र केन सूत्रेण ण्य प्रत्ययः?

४. बिदस्य गोत्रं -समस्तपदं किम्?

II ५. रैवतिकः इत्यत्र केन सूत्रेण इकादेशः?

६. क्रमकः। केन सूत्रेण वुन् प्रत्ययः?

७.शिखावलः इत्यत्र कः प्रत्ययः?

८.पौरस्त्यः इत्यत्र कः प्रत्ययः?

III ९..उत्से जातः -समस्तपदं किम्?

१०.दाधिकः इत्यत्र कः प्रत्ययः?

११.प्रास्थिकम्।अर्थः कः?

१२.आह्निकम्। ठञ् प्रत्ययः केन?

IV १३.मुद्गानां भवनं क्षेत्रं-समस्तपदं किम्?

१४.प्रज्ञादिभ्यश्च इति सूत्रेण कः प्रत्ययः?

१५.क्वाति इति सूत्रेण कस्य क्वादेशः ?

१६.दन्त उन्नत उरच् इति सूत्रेण दन्त शब्दात् कः प्रत्ययः? 4x1=4

Weight

PART-B

**16-17 द्वित्रैः वाक्यैः पञ्च समाधत्त।**

१७. हलोयमां यमि लोपः सूत्रार्थं लिखत।

१८. स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्- सूत्रार्थं लिखत ।

१९. जीवति तु वंश्ये युवा-अर्थं लिखत।

२०. बाह्वादिभ्यश्च-सूत्रार्थं लिखत।

२१. येचाभावकर्मणोः-सूत्रार्थं लिखत।

२२. स्त्रीभ्यो ठक्-सूत्रार्थं ल्खित ।

२३. कम्बोजाल्लुक्-सूत्रार्थं लिखत।

२४. भैक्षं-रूपं साधयत। 5x1=5

Weight

PART-C

**25-30 . चत्वारि व्याख्यात।**

२५.च्वौ च इति सूत्रं सप्रकरणं साधयत।

२६.अज्ञाते- सप्रकरणं व्याख्यात।

२७.इष्टस्य यिट च-अर्थोदाहरणं लिखत ।

२८. कु तिहोः- व्याख्यात ।

२९.वाचो ग्मिनि-व्याख्यात ।

३०.अहं शुभमोयुरत्-व्याख्यात।

4x2=8 Weight

PART-D

**31-33 . द्वयोरुत्तरं लिखत ।**

३१. अण् प्रत्ययविधायकानि पञ्चसूत्राणि सप्रकरणं साधयत।

३२. ठक् प्रत्ययविधायकानि पञ्चसूत्राणि सप्रकरणं साधयत। 2x4=8 Weight

३३. यत् प्रत्ययविधायकानि पञ्चसूत्राणि सप्रकरणं साधयत

ANSWER KEY

१. अण्

२. गर्गादिभ्यो यञ्

३. दित्यादित्यादित्यपत्युत्तरपदाण्यः।

४ बैदः.

५ .ठस्येकः.

६ .क्रमादिभ्यो वुन्

७ .वलच्।

८ .त्यक्

९. औत्सः।

१०. ष्ठक्।

११. प्रस्थेन करीतम्।

१२ .तेन निर्वृत्तम्।

१३. मैद्गीनम्।

१४. अण्।

१५ .किम् शब्दस्य।

१६. उरच्।

१७ हलः परस्य यमो लोपो स्यात् यमि परे इति सूत्रार्थः ।

१८. धान्यानां भवने इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः  इति सूत्रार्थः।

१९. वंश्ये पित्रादौ जीवति पौत्रादेः यदपत्यं चतुर्थादि तद्युवसंज्ञमोव स्यात्।

२०. बाहोरपत्यमितिविग्रहे बाहुशब्दात् इञ् प्रत्ययः स्यात् इति सूत्रार्थः।

२१ .यादौ तद्धिते परे अन् प्रकृत्या स्यात् न तु भावकर्मणोः।

२२ .स्त्रीप्रत्ययान्तेभ्यो ठक् स्यात् इति सूत्रार्थः।

२३.  कम्बोजात्परस्य तद्राजस्य लुक् स्यात् इत्यर्थः।

२४. भिक्षाणां समूहः  भैक्षम् इत्यत्र तस्य समूहः इत्यणि प्राप्ते  भिक्षाहिभ्योऽण् इति अणि

सुपो  लुकि भत्वे अकारलोपे आद्यचो वृद्धौ विभक्तिकार्ये भैक्षं इति।

२५ .च्वौ परे पूर्वस्य दीर्घः स्यात् ।अग्नीभवतीत्युदाहरणम्।कृस्नं शास्त्रं अग्निः सम्पद्यते। अग्नसात् इत्यत्र कृभ्वस्तियोगे इति च्वौ

, च्वेः सर्वस्यलोपे  विभाषासति कास्न्ये इति सा प्रत्यये यस्येति च इति इकारलोपे विभक्तिकार्ये च कृते अग्निसाद् भवति।

२६  .कस्यायमश्वोऽश्वकः ।अज्ञातविशेषो अज्ञातः। अज्ञाततत्वोपाधिके अर्थे वर्तमानात्  प्राति

पदिकात्तिङन्ताच्च स्वार्थे  यथाविहितं प्रत्ययो भवति। अश्वकः इत्युदाहरण्म्।अत्र अज्ञात

शब्दात् अज्ञाते इति सूत्रेण क प्रत्यये सुपोलुकि विभक्तिकार्ये च कृते अश्वकः इति रूपम्।

२७. वहोपरस्य इष्टस्य लोपः स्यात् इडागमश्च।भूयिष्टः इति उदाहरणम्. ।अतिशयेन

बहुः भूयिष्टः इत्यत्र अतिशयने तमबिष्टन्नौ  इति इष्टनि ,इष्टस्ययिट च इति

इष्टन इकारलोपे बहोः स्थाने भू इत्यादेशे यिटि च कृते विभक्तिकार्ये रूपसिद्धिः।

२८.  किमः कु स्यात् तादौ हादौ च विभक्तौ परतः इत्यर्थः।कुतः , कस्मात् इत्याद्युदा- हरणम्।कुतः  इत्यत्र पञ्चम्यास्तसिल्

इति तसिलि  इलो लोपे  सुपो लुकि प्राग्दिशोविभक्तिः

इति तसिलो विभक्तित्वे  कु तिहोः इति किम- कु आदेशे कु तस्  इति जाते कृत्तद्धितसमासाश्च     इति प्रादिपतिकत्वे रुत्वे

विसर्गे कुतः इति।

२९.   वाच् शब्दात् मत्वर्थे ग्मिनि प्रत्ययः स्यादित्यर्थः। नकारादिकारः उच्चारणार्थः।वाग्मी इत्युदाहरणम्।वागस्यास्ति वाग्मी इत्यत्र

वाचोग्मिनि इति ग्मिनि प्रत्यये स्कोः संयोगाद्योरन्ते च इति कलोपे सु प्रत्यये उपधादीर्धे सुलोपे नसोपे वाग्मी इति रूपम्।

३०.. अहमिति मान्तमव्यमहङ्गारे। अहंयुः इति उदाहरणम्. अहमहङ्गारो अस्यास्तीति

अहंयुः इत्यत्र अहंशुभमोर्युस् इति युस् ,विभक्तिकार्ये च अहंयुः इति सिद्धम्।

३१ अश्वपत्यादिभ्यश्च,शिवादिभ्योऽण् भिक्षादिभ्योऽण् एते अण् प्रत्ययविधायकानि सूत्राणि भवन्ति। आश्वपदम् गणपदम् इति

अश्वपत्यादिभ्यश्च इति सूत्रस्य उदाहरणम्। भिक्षादिभ्योऽण् इति सूत्रस्य उदाहरणम् भैक्षम्। इत्यादि उदाहरणसहितं लेखनीयमम्

३२. प्राग्वतेष्टक् चरति ,धर्मं चरति ,शिल्पं रक्षति इत्यादि सूत्राणि ठक् विधायकानि भवन्ति। तृतीयान्तात् गच्छति

भक्ष्यतीत्यर्थेष्टक् स्यात् इति चरति इति सूत्रस्यार्थः. हास्तिकः इति उदाहरणम्।

अनयारीत्या अस्य प्रश्नस्य उत्तराणि लेखनीयानि.

३३.प्राग्धिताद्यत्,शरीरवयवाद्यत्, राजश्वशुराद्यत् इत्यादि सूत्राणि यत् विधायकानि भवन्ति.।तस्मैहितमित्यतः प्राक् यदधिक्रियते।

शरीरावयववाचिनः प्रातिपदिकात्प्रत्ययो भवति तस्मिन् हितमित्योतस्मिन्विषये इति शरीरावययाद्यत् इति सूत्रस्यार्थः .एवं रीत्या

अस्यसूत्रस्य उदाहरणानि धातव्यानि।